१

गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः। अग्निः।जगती

**त्वम॑ग्ने॒ द्युभि॒स्त्वमा॑शुशु॒क्षणि॒स्त्वम॒द्भ्यस्त्वमश्म॑न॒स्परि॑।**

**त्वं वने॑भ्य॒स्त्वमोष॑धीभ्य॒स्त्वं नृ॒णां नृ॑पते जायसे॒ शुचि॑ः॥ २.००१.०१**

अग्ने- पावक। त्वम्। द्युभिः- ज्योतिर्भिः। आशुशुक्षणिः- सर्वतो दीप्तो भवसि। त्वम्। अद्भ्यः- उदकात्। वैद्युतः सन् जायसे। अथवा सर्वभूतहितक्रतुः सन् मूलशक्तिधाराभ्यो जायसे। त्वम्। अश्मनः- पाषाणादौष्णशक्तिरूपेण जायसे। अथवा जडशरीरमुपलब्धिस्थानं कृत्वा क्रतुरूपेण जायसे। त्वम्। वनेभ्यः- अरण्येभ्यः। ओषधीभ्यः- वीरुध्भ्यो भौममोगेभ्यो वा। जायसे। नृपते- मनुष्यपालक। शुचिः- परिशुद्धः सन्। नृणाम्- मनुष्याणां हृदि क्रतुरूपेण जायसे ॥१ ॥

**तवा॑ग्ने हो॒त्रं तव॑ पो॒त्रमृ॒त्विय॒ं तव॑ ने॒ष्ट्रं त्वम॒ग्निदृ॑ताय॒तः।**

**तव॑ प्रशा॒स्त्रं त्वम॑ध्वरीयसि ब्र॒ह्मा चासि॑ गृ॒हप॑तिश्च नो॒ दमे॑॥ २.००१.०२**

अग्ने। तव- त्वदर्थम्। होत्रम्- हव्यम्। तव- त्वदर्थम्। ऋत्वियम्- ऋतमयम्। काले भवम्। पोत्रम्- पोता शोधकः। शोधकः पवमानसोम एव। तस्य त्राणभूतकलशः पोत्रम्। तव- त्वदर्थम्। नेष्ट्रम्- यज्ञनेतृत्वम्। त्वम्। ऋतायतः- सत्यधर्मकामाय। अग्नित्- आग्नीध्रः अग्नीन्धकः। तव- त्वदर्थम्। प्रशास्त्रम्- शास्त्रानुशासनम्। त्वम्। अध्वरीयसि- ध्वररहितकर्म कामयसे। ब्रह्मा- मन्त्रात्मकः। च। असि- भवसि। गृहपतिश्च- कुटुम्बपालकः। दमे- सदने। असि ॥२ ॥

**त्वम॑ग्न॒ इन्द्रो॑ वृष॒भः स॒ताम॑सि॒ त्वं विष्णु॑रुरुगा॒यो न॑म॒स्य॑ः।**

**त्वं ब्र॒ह्मा र॑यि॒विद्ब्र॑ह्मणस्पते॒ त्वं वि॑धर्तः सचसे॒ पुरं॑ध्या॥ २.००१.०३**

अग्ने- पावक। सताम्- साधूनाम्। वृषभः- श्रेष्ठा। इन्द्रः- ईशनाधिदेवता। त्वमसि। त्वम्। नमस्यः- वन्दनीयः। उरुगायः- बहुधा सामभिर्गीयमानः। विष्णुः- सर्वव्यापी परमात्मासि। अग्नेः

Dr.Rangaji

WEBOLIM

स्वरूपविषयोऽयम्। ब्रह्मणस्पते- मेधामन्त्रपालक। रयिवित्- दानयोग्यधनदायिका। ब्रह्मा- महत्तत्त्वाधिदेवता। त्वमसि। विधर्त- हे धारक। त्वम्। पुरन्ध्या- धारणया। सचसे- सङ्गतोऽसि ॥३॥

**त्वम॑ग्ने॒ राजा॒ वरु॑णो धृ॒तव्र॑त॒स्त्वं मि॒त्रो भ॑वसि द॒स्म ईड्यः॑।**
**त्वम॑र्य॒मा सत्प॑ति॒र्यस्य॑ स॒म्भुजं॒ त्वमंशो॑ वि॒दथे॑ देव भाज॒युः॥ २.००१.०४**

अग्ने। त्वम्। राजा- स्वामी। धृतव्रतः- दृढधर्मः। वरुणः- ऋतदेवोसि। त्वम्। दस्मः- दर्शनीया। ईड्यः- स्तुत्या। मित्रः- स्नेहाधिदेवता। भवसि- असि। यस्य- यः। सम्भुजम्- अनुभवगम्यो भवति। सः। सत्पतिः- सत्तापालकः। अर्यमा- वितरणाधिदेवता सूर्यः। त्वमसि। देव- द्योतनशील। त्वम्। विदथे- यज्ञे। यैर्विदन्त्यात्मानमिति विदथाः। आत्मा यज्ञेन कल्पतामिति श्रुतौ। अंशः- मुख्यभागः। भाजयुः- भाजयिता असि ॥४॥

**त्वम॑ग्ने॒ त्वष्टा॑ वि॒धते॑ सु॒वीर्यं॒ तव॒ ग्नावो॑ मित्रमहः स॒जात्य॑म्।**
**त्वमा॑शु॒हेमा॑ ररि॒षे स्वश्व्यं॒ त्वं न॒रां शर्धो॑ असि पुरू॒वसु॑ः॥ २.००१.०५**

अग्ने। त्वम्। त्वष्टा- शिल्पाधिदेवता असि। सुवीर्यं- शोभनशक्तिम्। विधते- परिचरते प्रयच्छसि। मित्रमहः- हे महास्नेहसम्पन्न। ग्नावः- वाचः। तव- ते। सजात्यम्- सारूप्यं भजन्ते। आशुहेमा- क्षिप्रप्रेरयिता सन्। त्वम्। स्वश्व्यम्- शोभनप्राणम्। ररिषे- प्रयच्छसि। त्वम्। नराम्- नृणाम्। शर्धः- बलम्। असि। पुरूवसुः- प्रभूतसम्पदसि ॥५॥

**त्वम॑ग्ने रु॒द्रो असु॑रो म॒हो दि॒वस्त्वं शर्धो॒ मारु॑तं पृ॒क्ष ई॑शिषे।**
**त्वं वातै॑ररु॒णैर्या॑सि शंग॒यस्त्वं पू॒षा वि॑ध॒तः पा॑सि॒ नु त्मना॑॥ २.००१.०६**

अग्ने। त्वम्। महः- महतः। दिवः- नभसः। असुरः- प्राणदः। रुद्रः- वेगाधिदेवः। त्वम्। मारुतं शर्धः- मरुद्गणः प्राणगणः। पृक्षः- अन्नस्य। ईशिषे- स्वामित्त्वं वहसि। त्वम्। अरुणैः- दीप्तैः।

Dr. Rangaji

WEBOLIM

वातैः- प्राणैः। यासि- गच्छसि। शङ्गयः- मङ्गळस्य सदनभूतः। त्वम्। विधतः- हे धारक। पूषा- पोषकः सूर्यः सन्। त्मना- स्वरूपेण। नु- क्षिप्रम्। पासि- सर्वान् रक्षसि ॥६॥

**त्वमग्ने द्रविणोदा अरंकृते त्वं देवः सविता रत्नधा असि।**
**त्वं भगो नृपते वस्व ईशिषे त्वं पायुर्दमे यस्तेऽविधत्॥ २.००१.०७**

अग्ने। त्वम्। अरङ्कृते- त्वामलङ्कुर्वते। द्रविणोदाः- सम्पद्दायकः। त्वम्। देवः- द्योतनशीलः। सविता- आत्मसूर्यः। रत्नधाः- रमणीयभावानां धारकः। असि- भवसि। त्वम्। भगः- सौभाग्याधिदेवता। नृपते- राजन्। वस्वः- सम्पदः। ईशिषे- स्वामित्त्वं करोषि। यः। ते- त्वाम्। अविधत्- परिचरति। तस्य। त्वम्। दमे- सदने। पायुः- पालको भवसि ॥७॥

**त्वामग्ने दम आ विश्पतिं विशस्त्वां राजानं सुविदत्रमृञ्जते।**
**त्वं विश्वानि स्वनीक पत्यसे त्वं सहस्राणि शता दश प्रति॥ २.००१.०८**

अग्ने। त्वाम्। दमे- सदने। विश्पतिम्- जनपालकम्। राजानम्- स्वामिनम्। सुविदत्रम्- शोभनप्रज्ञम्। आ- आभिमुख्येन। ऋञ्जते- अलङ्कुर्वन्ति। स्वनीक- शोभनज्वालासम्पन्न। त्वम्। विश्वानि- सर्वाणि। सहस्राणि शता दश प्रति- प्रभूतानि। पत्यसे- पालयसि ॥८॥

**त्वामग्ने पितरमिष्टिभिर्नरस्त्वां भ्रात्राय शम्या तनूरुचम्।**
**त्वं पुत्रो भवसि यस्तेऽविधत्त्वं सखा सुशेवः पास्याधृषः॥ २.००१.०९**

अग्ने। त्वाम्- भवन्तम्। इष्टिभिः- सदिच्छाभिः। पितरम्- जनकम्। नरः- उपासका विदन्ति। तनूरुचम्- शरीरेषु दीप्यमानम्। त्वाम्। भ्रात्राय- सौभ्रात्राय। शम्या- कर्मणा विदन्ति। यः। ते- त्वाम्। अविधत्- परिचरति। तस्मै। त्वम्। पुत्रः- तनयः। भवसि। त्वम्। सुशेवः- सुसुखः। आधृषः- अन्तरायधर्षकः। सखा। पासि- पालयसि ॥९॥

**त्वमग्न ऋभुराके नमस्यस्त्वं वाजस्य क्षुमतो राय ईशिषे।**

Dr. Rangaji
WEBOLIM

**त्वं वि भास्यनु दक्षि दावने त्वं विशिक्षुरसि यज्ञमातनिः॥ २.००१.१०**

अग्ने। त्वम्। ऋभुः- उरुभासमानः। नमस्यः- वन्दनीयः। त्वम्। वाजस्य- गतिमतः। क्षुमतः- मन्त्रात्मकस्य। रायः- धनस्य। ईशिषे- स्वामित्त्वं वहसि। त्वम्। वि भासि- प्रकाशसे। दावने- दात्रे। अनु धक्षि- दहसि। तद्दत्तहव्यं स्वीकरोषीति भावः। अथवा दातुर्दुष्टवासना दहसीति भावः। त्वम्। विशिक्षुः- विशेषशिक्षकः। असि- भवसि। यज्ञम्- दानमुपासनं सङ्गतिकरणम्। आतनिः- विस्तारयसि ॥१० ॥

**त्वमग्ने अदितिर्देव दाशुषे त्वं होत्रा भारती वर्धसे गिरा।**
**त्वमिळा शतहिमासि दक्षसे त्वं वृत्रहा वसुपते सरस्वती॥ २.००१.११**

अग्ने। देव। वसुपते- सम्पत्पालक। त्वम्। दाशुषे- दात्रे। अदितिः- अखण्डप्रकृतिरसि। त्वम्। गिरा- वाचा। होत्रा- मन्त्रभूता। भारती- वाचां भरणशीला। वर्धसे। समस्तजगतां भरणशीला अखण्डप्रकृतिरदितिरेव वाचां भरणप्रकरणे भारतीति कथ्यते। त्वम्। इळा- स्थूला वाक्। शतहिमा- शतसंवत्सरं मनुष्ये। असि- वासं करोषि। त्वम्। वृत्रहा- आवरणनाशिनी। सरस्वती- रसचोदनदेवता ॥११ ॥

**त्वमग्ने सुभृत उत्तमं वयस्तव स्पार्हे वर्ण आ संदृशि श्रियः।**
**त्वं वाजः प्रतरणो बृहन्नसि त्वं रयिर्बहुलो विश्वतस्पृथुः॥ २.००१.१२**

त्वम्। अग्ने। सुभृतः- सुष्ठु धृतः। उत्तमम्- श्रेष्ठम्। वयः- आयुर्भवसि। तव- ते। स्पार्हे- स्पृहणीये। संदृशि- सुदर्शनीये। वर्णे- रूपे। श्रियः- दीप्तयः सन्ति। त्वम्। वाजः- भोगः। प्रतरणः- तारकः। बृहन्- महान्। असि- भवसि। त्वम्। रयिः- दानयोग्यधनरूपः। बहुळः- बहुविधः। विश्वतः- सर्वतः। पृथुः- विस्तीर्णो भवसि ॥१२ ॥

**त्वामग्न आदित्यास आस्यं१ त्वां जिह्वां शुचयश्चक्रिरे कवे।**

Dr. Ranganji
WEBOLIM

**त्वां रातिषाचो अध्वरेषु सश्चिरे त्वे देवा हविरदन्त्याहुतम्॥ २.००१.१३**

कवे- क्रान्तदर्शिन्। अग्ने। शुचयः- परिशुद्धाः। अदित्यासः- अखण्डप्रकृतिजा देवाः। त्वाम्। आस्यं जिह्वाम्- हव्यभक्षणाय मुखम्। चक्रिरे- अकुर्वन्। त्वाम्। रातिषाचः- दानयुक्ता देवाः। अध्वरेषु- ध्वररहितकर्मसु। सश्चिरे- सेवन्ते। त्वे- त्वयि। देवाः। आहुतम्- समर्पितम्। हविः- चरुपुरोडाशध्यानभावनादिहव्यम्। अदन्ति- अनुभवन्ति ॥१३॥

**त्वे अग्ने विश्वे अमृतासो अद्रुह आसा देवा हविरदन्त्याहुतम्।**
**त्वया मर्तासः स्वदन्त आसुतिं त्वं गर्भो वीरुधां जज्ञिषे शुचिः॥ २.००१.१४**

अग्ने- सर्वभूतहितक्रतो पावक। त्वे आसा- त्वामेव मुखं कृत्वेति भावः। विश्वे- सर्वे। अमृतासः- अमरणशीलाः। अद्रुहः- द्रोहभावनारहिताः। देवाः। आहुतम्- समर्पितम्। हविः- चरुपुरोडाशध्यानभावनादिहव्यम्। अदन्ति- अनुभवन्ति। त्वया। मर्तासः- मनुष्याः। आसुतिम्- रसम्। स्वदन्ते- अनुभवन्ति। त्वम्। वीरुधाम्- ओषधीनां भौमभोगानाम्। गर्भः- अन्तर्हितः सन्। शुचिः- पवमानरूपेण। जायसे- निष्पन्नो भवसि ॥१४॥

**त्वं तान्सं च प्रति चासि मज्मनाग्ने सुजात प्र च देव रिच्यसे।**
**पृक्षो यदत्र महिना वि ते भुवदनु द्यावापृथिवी रोदसी उभे॥ २.००१.१५**

अग्ने- सर्वभूतहितक्रतो। देव। सुजात- शोभनजन्मसम्पन्न। त्वम्। मज्मना- शुद्धया। तान्- मर्त्यान्। प्रति सं चासि- सङ्गच्छसि। प्र च रिच्यसे- तानत्यरेचयश्च। यत्। महिना- माहात्म्येन। अत्र- अस्मिन् यज्ञे। पृक्षः- हव्यम्। ते- तुभ्यम्। वि- विशेषेण। भुवत्- भवतु। उभे द्यावापृथिवी रोदसी- द्यावापृथिव्यौ। अनु- त्वामनुसृत्य भवतः ॥१५॥

**ये स्तोतृभ्यो गोअग्रामश्वपेशसमग्ने रातिमुपसृजन्ति सूरयः।**
**अस्माञ्च तांश्च प्र हि नेषि वस्य आ बृहद्वदेम विदथे सुवीराः॥ २.००१.१६**

Dr.Rangan.ji
WEBOLIM

अग्ने- सर्वभूतहितक्रतो। ये। सूरयः- मेधाविनो देवाः। स्तोतृभ्यः- उपासकेभ्यो मन्त्रविद्भ्यः। गोअग्र्याम्- चिद्रश्मिप्रधानाम्। अश्वपेशसम्- प्राणरूपिणीम्। रातिम्- दानयोग्यसम्पदम्। उपसृजन्ति। तांश्च। अस्मान् च। प्र- प्रकर्षेण। आ- आभिमुख्येन। नेषि- नयसि। हि- खलु। वस्य- उत्तम। सुवीराः- शोभनवीर्यसम्पन्नाः सन्तः। विदथे- यज्ञे। यैर्विदन्त्यात्मानमिति विदथाः। आत्मा यज्ञेन कल्पतामिति श्रुतौ। बृहत्- महत्। वदेम- ब्रूमः॥१६॥

Dr. Ranganji

WEBOLIM